तादात्म्ये च न प्रत्यास — संतरमपेक्ष्यते तस्य साक्षिभास्यत्वात्॥ निरवयवात्मनि संयोगा — सिंभवाच्च न भेदस्येंद्रियसन्निकृष्टत्वं॥ एकत्र संयोगतदभावायोगात्॥ वृक्षादावपि औपाधिकभेदवत्त्वेवतदुभयप्रतीतेः॥ श्रीकृष्णपरब्रह्मणे नमः॥ श्रीराम

मनःसंयुक्तत्वासंभवान्नह्यते च भेदे मनःसन्निकर्षाभावान्नत — त्वेत्याह॥ निरवयवात्मनीति॥ निरवयवे संयोगः किमव्याप्यवर्त्तते उत व्याप्य। नाद्यः निरवयवे सं — योगस्य स्वात्यंताभावसमानाधिकरणत्वातिरिक्ताव्याप्यवृत्तित्वस्यानिरूपणात् तस्य च भावाभावयोरेकत्र विरोधे नासंभवाद विरोधे वा विरोधवार्त्तायाः सर्वत्रोच्छेदप्रसंगात्तयोर विरोधे नियामकाभावेन व्याप्यवृत्तित्वापाताच्चेत्यभिप्रेत्याह॥ एकत्रेति॥ ननु भावांतराणां स्वाभावसामानाधिकरण्यविरोधेऽपि संयोगादीनां तदविरोधः एकस्मिन्नेव वृक्षादौ कपिसंयोगतदभावयोः सर्वानुभवसिद्धत्वादिति नेत्याह॥ वृक्षादाविति॥ वृक्षस्यस्वतएकत्वेप्यवच्छेदकावयव

=व्याप्यवृत्तित्वनियमात्<

॥१५॥

राम

भा ५

कृष्ण

भेदप्राचीनभेदवत्त्वादौपाधिकभेदवतोरेव वृक्षयोः संयोगतदभावाधिकरणत्वं भावाभावयोः स

२ विरोधः भावेऽभा
र्वत्र विरुद्धमेवेत्यर्थः ॥ एकस्मिन्नपि औपाधिकभेदं साधयति ॥ अग्रे वृक्ष इति ॥ न च मूले कपिसं
योगवान्नेत्यनुभवात्संयोगात्यन्ताभाव एव प्रतीयते न तु संयोगवद्वृक्षभेद इति वाच्यं ॥ संयोगिनः
प्रतियोगित्वानुभवविरोधात् विशिष्टप्रतियोगिकभेदप्रतीते विशेषणाभावविषयत्वे घ
टः पटो नेत्यादिभेदप्रतीतेरपि घटादौ पटत्वाद्यभावविषयत्वोपपत्तेर्भेदो दत्तजलांजलिः स्यात् ॥
तर्ह्येकस्मिन्नात्मन्यौपाधिकभेदेन मनःसंयोगतदभावौ स्तामित्याशंक्याह ॥ न च परमत इति ॥ तद

७=आत्माभिन्ने =तस्मिन्नात्मनि
भेदादिकं वास्तवमिति मते तदभिन्ने तस्मिन्वास्तवभेदायोगादत्यन्तभेदवादिभिरव्याप्यवृत्ति

॥ अग्रे वृक्षः कपिसंयोगवान् मूले नेत्यनुभवात् ॥ न च परमते तदभिन्ने तद्भेदः संभ
वति ॥ सिद्धान्ते कल्पितप्रदेशावृत्तिसंयोगस्य प्रमाहेतुत्वं न संभवति ॥ —— कृष्णगोविंद
॥ राम कृष्ण गोविंद ॥ राम कृष्ण गोविंद ॥ राम कृष्ण गोविंद ॥ राम ——

भेदानंगीकाराच्चेति भावः ॥ ननु परमते निरवयवात्मनि संयोगासंभवेऽपि सिद्धान्ते तत्तदुपा
धिपरिकल्पितात्मप्रदेशाभेदेन मनःसंयोगसंभवात्तन्निमित्तो जीवपरभेदः प्रमा स्यादित्याशं
क्याह ॥ सिद्धान्ते चेति ॥ मिथ्याभूतप्रदेशाभेदसापेक्षस्य मनःसंयोगस्यापि मिथ्यात्वात्तस्य
बाष्पधूमादिवत् प्रमापकत्वं न संभवति ॥ न चैवं वेदान्तानां प्रमापकत्वानुपपत्तिरिति वाच्यं ॥
तेषां स्वरूपेण कल्पितत्वेऽप्यर्थक्रियासमर्थत्वादपौरुषेयतया निरस्तसमस्तदोषशंकानां
बाधकाभावेन यादृच्छिकसंवादिलिंगविशेषवत् प्रमापकत्वोपपत्तेः भेदज्ञानस्य तु कल्पि
तसामग्रीप्रसूतत्वात् ख्यातिन्यायहतविषयत्वाच्च प्रमात्वमनुपपन्नमिति भावः ॥ श्रीराम

=प्रत्यक्षवि । षयः=२॥

=सफलप्रवृत्तिजनकं लिंगं=२म२

मे. चि. स.

॥१६॥

राम

ननु संयोगतदभावयोर्नाधिकरणभेदनियमः - तयोरवच्छेदकभेदेनैकत्रा - प्यविरोधा देकस्मिन्नपि वृक्षादावग्रावच्छेदेन मूलाद्यवच्छेदेन भेदात् कपिसंयोगादिदर्शनादात्मन्यपि शरीरा द्यवच्छेदकभेदात्मनः संयोगाद्युपपत्तिरितिनेत्याह ॥ नचैकस्मिन्नेति ॥ अग्रत्वादेः संयो गाधिकरणतावच्छेदकत्वं किं तदभाववद्वृत्तित्वे सति तदाश्रयवृत्तित्वमुत तदाश्रयवृत्ति त्वमात्रं नाद्यः संयोगतदभावयोरधिकरणभेदाभावे संयोगाधिकरणस्यैव तदभावाधि करणत्वात् आश्रयत्वात्संयोगाधिकरण - त्वाश्रयवृत्त्यग्रत्वादिस्तदभाववद्वृत्तित्वायोगादित्या ह ॥ अधिकरणेति ॥ नद्वितीयः अतिव्याप्तेरित्याह ॥ तदधिकरणेति ॥ एवं निरवयवे संयोग

नचैकस्मिन्नप्यवच्छेदकभेदादेव भावाभाववृत्तिरिति वाच्यं ॥ अधिकरणभेदा भावे तदभाववद्वृत्तित्वघटितावच्छेदकत्वस्याग्रत्वादेरयोगात् ॥ तदधिकरणवृ त्तित्वस्य प्रमेयत्वादिसाधारण्यात् ॥ संयोगस्याव्याप्यवृत्तित्वमनुभवपराहतम् संसर्गे

२४

स्याव्याप्यवृत्तित्वं निराकृत्याधुनाव्याप्यवृत्तित्वकल्पं निराकरोति ॥ संयोगस्येति ॥ किं सर्व स्य संयोगस्य व्याप्यवृत्तित्वमभिमतं उत निरवयववृत्तेः ॥ नाद्यः स्थाण्वादिसंयोगानां व्याप्यवृत्तित्वस्यानुपलब्धिपराहतत्वादसंभवाच्च ॥ नद्वितीयः परमते परमाणुसंयोगस्य प रमाण्वन्तरव्यापित्वे द्व्यणुके प्रथिमानुपपत्तेः ॥ किंच परिच्छिन्नापरिच्छिन्नद्रव्यसंयोगस्य परिच्छिन्नव्यापित्वेऽप्यपरिच्छिन्नव्यापित्वादर्शनादन्यथा नीरक्षीरवदुभयोरपि समव्याप्तिः स्यादिति भावः ॥ राम ॥ कृष्ण ॥ राम ॥ कृष्ण ॥ राम कृष्ण ॥ राम ॥ कृष्ण ॥ कृष्ण

संयोगस्य व्याप्यवृत्तित्वे बाधकांतरमाह ॥ तथात्वइति ॥ कर्णशष्कुल्यवच्छिन्ननभस एव परमते श्रोत्रेंद्रियतया शब्दग्राहकत्वांगीकारात् तत्संयोगस्य च नभोमात्रव्यापित्वे कृत्स्नस्य नभसः श्रोत्रत्वापातेन तन्निष्ठानां सर्वेषां शब्दतदभावा - नामुपलंभप्रसंगः ॥ भिन्नभिन्नसंयोगावच्छेदेनोत्पद्यमान - शब्दस्याव्याप्यवृत्तित्वं च न स्यात् ॥ अत एव कर्णगोलकस्य सर्वत्राभावान्न सर्वशब्दोपलब्धिरिति निरस्तं ॥ तथापि व्यापि सर्वशब्दोपलंभस्य दुर्वारत्वात् गोलकसंयोगस्य रूपज्ञाने व्यभिचारेणासतींद्रियसन्निकर्षैकेवचव्यतिरेकाभावेन हेतुत्वायोगाच्चेति भावः ॥ मनोनभेदे प्रमाणांत

॥ तथात्वे शब्दादेः सर्वत्र प्रतीतिप्रसंगाच्च ॥ तस्मान्न मनसो भेदेन संबंधः ॥ नापि मनसः सहकारी योग्यानुपलंभोस्ति ॥ ईश्वरस्य प्रत्यक्षायोग्यत्वात् ॥ प्रत्यक्षयोग्यानुपलब्धिर्हि योग्यानुपलब्धिः ॥ प्रतियोगितद्व्याप्येतरसकलतदुपलंभककालीनानुपलब्धेस्त्वात्रासंभवात् ॥

दसत्त्विरूपत्वादिस्तदुपसंहरति ॥ तस्मादिति ॥ अयोग्यानुपलब्धिर्यं तद्विवृणोति ॥ नापि मनस इति ॥ उपलब्धुं प्रत्यक्षेणावगंतुं । योग्यस्य प्रतियोगिनोऽनुपलंभो योग्यानुपलंभः सोऽभावरूपभेदग्राहकेंद्रियस्य सहकारी वक्तव्यः सः मनसेश्वरभेदग्रहे न संभवति । तत्प्रतियोगिन ईश्वरस्य प्रत्यक्षायोग्यत्वादित्यर्थः ॥ ननु योग्यत्वमनुपलब्धेरेव विशेषणं तच्चानुपलब्धेस्तद्व्याप्याभावे प्रतियोगितद्व्याप्येतरसकलतदुपलंभककालीनत्वमेवेति नवीनोत्प्रेक्षितमार्गं स्य प्रतियोगि प्रत्यक्षज्ञानजनकस्य तदुपलंभकपदाभिलप्यत्वान्न प्रत्यक्षत्वम

= अनुपलब्धि
= ग्राह्याभाव

भे॰ चिं॰ स॰

॥१९७॥

राम

=मनस्त्वाभावं साक्षात्करोमीत्यनुव्यवसायाभावेन=४

३=मनस्त्वोपाधिधापादनाशक्यत्वरूपोपायाभावे=३

प्रतियोगिनोऽप्रत्यक्षत्वेप्यभावप्रत्यक्षत्वदर्शनात्प्रतियोगिप्रत्यक्षत्वं तन्त्रं न तन्त्रमिति प्रागुक्तं नि
राकरोति॥ घटे मनस्त्वमिति॥ यद्यपि पराभिमतपरमाणुत्वोपाधेर्धर्मिप्रत्यक्षत्वेन प्रत्यक्षत्वमा
पादयितुं मनस्त्वस्य मनस्त्वस्य तु जातित्वात्तदापादनं सुकरमिति पराभिमानस्तथापि तदुभयाभा
वे पि साक्षात्करोमीत्यनुभवाभावेन तदप्रत्यक्षत्वमेव युक्तं न हि परोक्तेन्द्रियसामग्रीमात्रान्मन
स्त्वाभाव एव प्रत्यक्ष इति स्वीकारो युक्तो नुपलब्धिविरोधादिति भावः॥ घटे मनस्त्वाभावस्याप्रत्यक्षत्वे
हेत्वन्तरमाह॥ न हि मनस इति॥ घटस्य मनसः सकाशाद्भेदाप्रतिसंधानदशायां घटे मनस्त्वसंशय
विपर्ययोरन्यतरापातेन घटे तदभावनिश्च —— याद्योगात् घटमनसोर्भेदनिश्चयदशाया

घटरूपधर्मि २

=मनस्त्वाभा ४ वाप्रत्यक्षत्वे

=अनुव्यवसायाभावविरोधात्॥=५

॥घटे मनस्त्वं नास्तीतिज्ञानं च परमाणुत्वं नास्तीति ज्ञानवन्नप्रत्यक्षं॥ न हि मनसो घ
टभेदाप्रतिसंधानदशायां तदनुभवोस्ति॥ अत एवातीन्द्रिये घटे घत्वाभावो न प्रत्यक्षः॥

त्वा२

=घटरूपधर्मि त्वि=१

मेव घटे मनस्त्वाभावानुभवो वाच्यः तदा च भेदप्रतियोगितावच्छेदकमनस्त्वाभावस्य तद्धर्मि
ण्यार्थिककृत्वान्नप्रत्यक्षत्वं क॰ल्प्यमिति भावः॥ भेदप्रतिसंधानदशायां भेदप्रतियोगितावच्छे
दकधर्माभावस्य भेदधर्मिण्यार्थिकत्वे गमकमाह॥ अत एवेति॥ परमते परमाण्वादौ घट
त्वाद्यभावस्य प्रतियोगितव्याप्येतरसकलतदुपलंभकसमवधानेपि प्रत्यक्षत्वं नोपपद्यते तत्स्य
हेतोः तथानुभवाभावात् घटपरमाण्वादीनां भेदप्रतिसंधानदशायामेव परमा — पवादौ धर्मिण्यतीन्द्रियधर्मा
घटत्वाद्यभावानुभवेन तत्र तस्यार्थिकत्वोपपत्तेश्च एवं प्रत्यक्षेपि धर्मिण्यतीन्द्रियधर्मा
भावः परोक्ष एवेत्यर्थः॥ श्रीकृष्णपरब्रह्मणे नमः॥ श्रीमद्गुरुरामचरणकमलेभ्यो नमः॥

घटे =मनस्त्वरूपातीन्द्रियधर्माभावः२ कृष्ण

एवमतीन्द्रियप्रतियोगिकात्यंताभावग्रहे योग्यानुपलंभं निरस्यतदन्योन्याभावरूपेश्वरभेद
ग्रहेपि स नास्तीत्याह ।। न च नाहमीश्वर इति ।। तत्र हेतुस्तत्कालीनेति ।। भेदधीपूर्वक्षणे ▪ स
तोपि मनस्य क्षकारादेरतीन्द्रियेश्वरग्रहायोग्यतया प्रतियोग्यनुपलंभकाभावान्न तत्र विवक्षि-
तयोग्यानुपलंभ इत्यर्थः ।। इदानीं नवीनतरोत्प्रेक्षितमनूद्य दूषयति ।। यत्त्वित्यादिना ।। सा
क्षादभावविरोधित्वं प्रतियोगिन एव अन्यस्य तु तत्प्रतियोगिव्याप्यत्वेनेति सर्वत्र स्थितिः ।।
तथा च प्रतियोगिसत्त्वस्यानुपलब्धिविरोधित्वं तत्प्रतियोग्युपलब्धिव्याप्यत्वेनैवेतिव
क्तव्यं । एवं चान्यत्र प्रतियोगिसत्त्वस्याभाव[illegible] स्थलीयोपलंभाव्याप्यत्वेन तत्रस्यानु

।। न च नाहमीश्वर इति भेदप्रतीतिदशायामीश्वरोपलंभकसमवधानमस्ति ।।
तत्कालीनमनआदेस्तादयोग्यत्वात् ।। यत्तु यत्सत्त्वमनुपलब्धिविरोधी स्या
दियोग्यानुपलब्धिनिर्वचनं तदसत् ।। यत्र कुत्रचित्प्रतियोगिसत्त्वस्यान्यत्रो
पलंभाव्याप्यत्वेनाभावदेशीयं तत्स[illegible]त्वं तद्व्याप्यं वक्तव्यं । तच्च न संभवति ।। अधि
भावाधिकरणे प्रतियोगिवैशिष्ट्यसत्त्वेऽभावप्रमानुपपत्तेः ।। तर्कितं तत्र तदि

पलंभविरोधित्वायोगात् यत्र यत्सत्त्वमित्यादि वदताऽभावाधिकरण एव प्रतियो
गिसत्त्वं तदुपलंभं वाच्यः तत्रश्च नाभावधीसं▪भव इति वरघातायकन्यावरणमि
ति न्यायापात इति भावः । नन्वु यत्र यत्सत्त्व[illegible]मित्यत्र तर्कितमिति विवक्षितत्वाद भा
वाधिकरणेन प्रतियोगिसत्त्वापात इति शंकते ।। तर्कितमिति ।। तर्कितप्रतियोगिसद

= तात्त्विकप्रतियोगि

= घटरूपप्रति
योगिसत्त्वस्य

स्य ३

भे॰ धि॰ स॰
॥१८॥
राम

=स्यातत२

द्वितीये त्वसतोनुपलब्धिविरोधित्वमसंभवीत्यभिप्रेत्य दूषयति॥ तर्कितस्यापीति॥ ननु प्रतियोगिवैशिष्ट्य-
स्यान्यत्रसत्वादनुपलब्धिविरोधित्वमभावाधिकरणे चो सत्वादनुपलंभस्याभावधीरित्याकृते॥ तत्रास-
दपीति॥ किमभावाधिकरणे प्रतियोगिवैशिष्ट्यस्यानुपलब्धिविरोधित्वमभावप्रत्यक्षत्वे प्रयोजकमु-
तयत्र कुत्रचित्। तत्राद्यमसंभवेन निराकरोति॥ तद्धीति॥ द्वितीयमतिप्रसंगेन दूषयति॥ क्वचिदनु-
पलंभेति॥ किं चास्मिन् पक्षेऽतीन्द्रियेश्वरादितादात्म्यस्य कुत्राप्यनुपलंभविरोधित्वाभावात्तदभाव-
रूपो भेदो न प्रत्यक्षः स्यादिति द्रष्टव्यं॥ अभावाधिकरणे प्रतियोगिवैशिष्ट्यस्यासत्वेपि तदुपलंभ-
कस्य सत्वादनुपलब्धि विरोधित्वमित्याशंक्यासतः समस्तसामर्थ्यविरहात् तद्यात तदधीनं कि-
॥ तर्कितस्यापि सत्वासत्वान्यतरत्वात्॥ तत्रासदप्यन्यत्र सदिति चेत्तर्हि तत्रैव तदनुपलब्धि-
विरूपानाभावाधिकरणे॥ क्वचिदनुपलंभविरोधेनान्यत्राभावनिरूपणेऽतीन्द्रिये घटत्वा-
घटाभावः प्रत्यक्षः स्यात्॥ अभावाधिकरणे प्रतियोगिवैशिष्ट्यमसत्वादेवनानुपलंभवि-
रोधि न वासतां किंचिन्निरूप्यते॥ न च यत्र यत्सत्वादनेनानुपलंभाभाव आपादयितुं शक्यते तत्र तु
तदभावः प्रत्यक्ष इति वाच्यं॥ असता आपादितेन वैशिष्ट्येनान्यापादनायोगात्॥
मपि न संभवतीत्याह॥ अभावाधिकरण इति॥ किंचिद्घटा स्यादित तस्याव्याप्येन तेन न किंचिदापा-
दनीयमिति भावः॥ न चाभावाधिकरणे प्रतियोगिवैशिष्ट्यस्यासतः स्वरूपेणानुपलब्धिविरो-
धित्वं न ब्रूमो येनोक्तदोषः स्यात् किंतु तत्र तस्यारोपितस्य प्रतियोग्यनुपलंभाभावरू-
पोपलंभापादकत्वेन तत्तस्तत्र तर्कितप्रतियोगिसत्वेनापादनयोग्योपलंभाभाव एव योग्यानुप-
लंभ इति नवीनतमानां कल्पनां निराकरोति॥ न च यत्रेति॥ आपादनेनारोपेणाभावाधिक-
रणे प्रतियोगिसत्वस्यापादितस्याप्यसत्वाविशेषान्न तदुपलंभापादकत्वं क्वचिदपि संभवति अ-

पा२

ति२

रूप

नचैवं सति वन्ह्यभावेनापादितेन पर्वतादौ धूमाभावापादनमपि न स्यादिति वाच्यं॥ तत्रापि
वन्ह्यभाववि[illegible]त्वे सति धूमाभावविकल्प - मात्रोदयो न कस्यचिदापादकत्वाद्यस्ति न चा
निर्वचनीयवादिना तदुपपाद नीयमिति भावः॥ किंचाभावाधिकरणे प्रतियोगितद्व्याप्येत
रसकलतदुपलंभकसामग्र्यां सत्यामेव कुतं तत्र तत्सत्वमापादितं तदुपलंभापादकमित्यभि
मतं किं वा त[illegible] वैशिष्ट्यमात्रं तत्रापादितं तदुपलंभापादकमिति। नाद्यः दृष्टादृष्टसमुदायात्म
=कार्याभावे६ कसामग्र्याः कार्यैकगम्यतया तदभावे दुर्ग्रहत्वात् तदूहाभावे चा[illegible]धकाराद्यतद्देशादिवसहकारि
वैकल्यादनुपलंभोपपत्तिशंकया तर्कितस्यापि प्रतियोगिनः स्वोपलंभापादकत्वायोगाद

॥ प्रतियोगिवैशिष्ट्यमात्रेणाभावाधिकरणे तदुपलंभप्रसंजनायोगात्॥ अभावग्रा
हकेणएं साऽन्यदेशीयप्रतियोगिवैशिष्ट्यस्याग्रहणे न तस्यानुपलब्धिविरोधाभावाच्चे

तींद्रियोपलंभकाभावेन तदभावस्य प्रत्यक्षत्वायोगाच्चे [illegible]त्येतदति स्पष्टमित्यभिप्रेत्य द्वितीयं दूषयति॥ प्रतियोगिवैशिष्ट्यमात्रेणेति॥ आरोपितेनेति शेषः॥ घटवति देशे पितत्सत्तामात्रे
णा तदुपलंभाभावादन्यत्रा[illegible]पितन्मात्रमारोपितं न तदुपलंभापादकमिति सर्वः॥ किंच देशा
विशेषे प्रतियोगिसत्वस्या[illegible]नुपलब्धि[illegible] विरोधित्वानुसंधानवत्तैवान्यत्रा
पितेन तदापादनीयमिति वाच्यं। न चाभावोपलंभसमये नियमेन देशविशेषे प्रतियोगि
त्वानुसंधानमस्ति न चोक्तापादनरूपयोग्यानुपलंभं विनाभावधीः संभवतीति नत्व
दुक्तरीत्याभावप्रत्यक्षत्वसिद्धिरित्याशयेनाह॥ अभावग्राहकेणेति॥ श्रीरामजयराम॥

35

ने. धि. स.
॥१९॥
राम

नन्वभावाधिकरणेऽसतः प्रतियोगिविशिष्टस्य तदुपलंभापादनापादकत्वेपि तत्स्थ न्तिरस्ति
ततस्तत्संसेवाभावप्रत्यक्षत्वप्रयोजिकेत्याशंक्याह॥ किंचेति॥ नान्यदिति असतोऽतींद्रियत्व
मर्पितताया: स्वरूपापर्पितताया वा शंकेरसंभावितत्वादिति भाव:॥ व्याप्तेरपि सामानाधिक
रण्यरूपाया: समानकालीनत्वरूपाया वा स्वरूपेणासत्त्वसंभवान्न तज्ज्ञानं शक्तिरित्युपे
यमित्य ति शिक्षयति॥ न चासद्वैशिष्ट्येति॥ भवतु व्याप्तिज्ञानमेव शक्ति: सेवाभाव
प्रत्यक्षत्वप्रयोजिकेति मन्वानं प्रत्याह॥ ततस्त्वेति॥ प्रतियोगिसत्त्वस्य तदुपलंभेन सह व्या
प्तौ गृहीतायामेव व्यापकानुभवाभावेन व्याप्यप्रमेयाभावानुभवाभ्युपगमे नियमेन व्यतिरेक

॥ किंचापादनशक्ति: प्रमेयगताव्याप्तिस्तत्ज्ञानं वा नान्यत्॥ न चासद्वैशिष्ट्यनिरू
पिता व्याप्तिरस्तीति तज्ज्ञानं वाच्यं॥ ततस्त्वाभावधीस्तर्वनियमेन व्यतिरे
कव्याप्तिज्ञानेव न्यायादावविवाभावेऽनुमितिरेवस्यान्न प्रत्यक्षं॥ एवमपि प्रत्यक्ष
योग्यशब्दादेरभाव: प्रत्यक्ष: स्यान्न त्वतींद्रियाभाव:॥

त्यर्थ:॥ न चानुमिति
नुमानसामग्रीसत्वेनाभावस्यानुमेयत्वमेव स्यान्न प्रत्यक्षत्वमि सामग्रीप्राबल्यादपरोक्षैवाभावधी: स्या
सामग्र्यां सत्यामपि संशयोत्तर प्रत्यक्षवत्प्रत्यक्षसामग्रीत्वेनाकुप्त त्वात्तत्प्राबल्यस्य दूराप
दिति वाच्यं॥ अनुपलंभस्य कचिदपि प्रत्यक्षसामग्रीत्वेनाभावप्रत्यक्ष
तत्वादिति भाव:॥ प्रत्यक्षप्रतियोगिसत्त्वस्य तदुपलंभव्याप्यत्वग्रहाधीनाभावप्रत्यक्ष
त्वप्रयोजकत्वमंगीकृत्याप्यतींद्रियेश्वरादिप्रतियोगिकाभावस्य प्रतियोगिन्युक्तप्रका
रासंभवान्न प्रत्यक्षत्वेन स्यादित्याह॥ एवमपीति॥ श्रीकृष्णपरमात्मने नम:॥ श्रीराम कृष्ण

=अतीन्द्रियप्रतियोगिनः २

यदप्युक्तमतीन्द्रियस्यापि प्रतियोगिनः प्रत्यक्षधर्मिण्यापादितस्य प्रत्यक्षत्वयोग्यता
यास्त्वोपलंभापादकत्वेनानुपलंभविरोधित्वमस्तीति तदप्यसाधु । तस्य धर्मि
त्व प्रत्यक्षत्वस्याप्युपलंभापादकत्वापातेन त्वोपलंभापादक त्वस्य दूरापेतत्वादित्यभिप्रेत्याह ॥
मनस्त्वादेरिति ॥ यत्र मनस्त्वं तत्राणुत्वमिति नियमेन तद्व्याप्यात र्कितघटस्यापि
न अणुत्वोपाते तद्धर्मिमनस्त्वस्यानुपलंभ एव न्याय्य इति न त्वदुक्तयोग्यानुपलंभसंभ
वद्दूत्यर्थः ॥ न च कुंभे महत्त्वोद्भूतरूपवत्त्वयोर्निश्चितत्वेन तत्र मनस्त्वारोपेतस्या
पि प्रत्यक्षयोग्यत्वात्तित्वापत्त्या तदुपलंभः कुंभे प्रसंजनीयो नाणुत्वादिरिति वाच्यं ॥ अणुत्वा

॥ मनस्त्वादेर्घटे तर्कितसत्त्वस्य व्यापकाणुत्वापादने नानुपलंभाविरोधित्वात् ॥
किंच सहकार्यभावेन ब्राह्मणत्वाद्यनुपलंभवज्जीवे ब्रह्मत्वाभेदानुपलंभोप्यभावे विनापपद्यते ॥

देरपि मनस्त्वव्यापकत्वेन निश्चयात्तदारोपे तदारोपस्याप्यनिवार्यत्वात् ॥ यदि तु कुंभे मन
स्त्वोपलंभापादनसंभवमात्रेण तत्र तदभावः प्रत्यक्षः स्यात् मनस्यपि कुंभत्वारोपेत
व्यापकमहत्त्वाद्यापत्त्या तत्रापि कुंभत्वोपलंभापादनसंभवात्तदभावोपि प्रत्यक्षः स्यान्न चे
तदनिष्टमिति भावः ॥ एवं तावदभावग्राहकप्रत्यक्षसहकारिणी योग्यानुपलब्धिः सर्वत्र दुर्नि
रूपेत्युक्तं संप्रत्यन्यत्रापि क्वाचित्कत्वात् जीवेश्वरभेदग्रहे तत्संभव एव नास्ति जीवपराभेद
स्य सतस्तर्कितस्य वा मानसप्रत्यक्षयोग्यत्वेपि क्रत्वादिसिद्धसहकार्यभावेन तत्तत्सादुपल
भाभावसंभवादित्याह ॥ किंच सहकारीति ॥ पूर्वपक्षिप्रत्यक्षरहितासाधारणवेषादिमदेहव

तर्हि २ मनसि

37

भे. चि. सि.
॥२०॥
राम

नित्रब्राह्मणत्वक्षत्रियत्वादिकं चक्षुरादिसन्निकृष्टमपि न तन्मात्रेण निश्चीयते तत्र कस्य हेतोः तद्यंजक
विशिष्टमातापितृजत्वाद्युपस्थापकोपदेशरूपसहकार्यभावात् ॥ न च तावता न ब्राह्मण्याद्य
भावनिश्चयः एवं जीवब्रह्माभेदे तद्ग्रहणयोग्यान्तःकरणे च सत्यपि सहकार्यभावान्न तदुपलम्भोपप नु
गया ४ त्तो कुतो यो नुपलम्भः कुतस्तरां च तेद् दसिद्धिरित्यर्थः ॥ ननु दृष्टान्ते सहकारित्वमाचार्योपदेश
स्यान्वयव्यतिरेकसिद्धं ब्रह्माभेदानुभवे तु सहकार्यन्तरसत्त्वे मानाभावात्तदभावप्रयुक्तत्वमनु
पलब्धेरसिद्धमिति ग्राह्याभावप्रयुक्तत्वमेव वाच्यमित्याशङ्क्याह ॥ तत्र लौकिकेति ॥ तस्यापथा
अभिनहनं प्रमुच्य प्रब्रूया देतां दिशं गन्धारा एतां दिशं व्रजेति स ग्रामाद्ग्रामं पृच्छन् पण्डितो मेधा

॥ तत्र लौकिकोपदेशवदत्रापि आचार्यवान् पुरुषो वेद श्रोतव्य इत्यादिना सहकार्यन्त
र त्वात् ॥ राम ॥

वी गान्धारानेवोपसंपद्येतैवमेवाचार्यवान् पुरुषो वेदेति यथा कश्चिदभिनद्धाक्ष एव गान्धारदेशे
भ्योऽपकृष्यारण्यान्तःप्रापितस्तत्र तथैव बद्धाक्षः परिभ्रमन् केनचिद्दयालुनापाथेनाक्षा
भिनहनं प्रमुच्य स गान्धारदेशमार्गमुपदिष्टस्तदनुगुणयुक्तीरनुसंदधानो गान्धारानेव प्राप्नो
ति एवं स्वप्रकाशब्रह्मात्मापि जीवोऽनाद्य — विद्याकामकर्मादिभिः प्रसृष्टविवेकः संसा
राटवीं प्रापितो नानायोनिषु परिभ्रमन्नात्मतत्त्वनिश्चयवदाचार्योपदेशादिनात्मतत्त्वं सा
क्षात्करोतीति श्रवणादीनां ज्ञानाङ्गतां दर्शयति ॥ तथा श्रोतव्यो मन्तव्य इत्यादिना ज्ञानोद्देशेन रुप्य
श्रवणादिविधानात्तेषां तादर्थ्यमेवगतं ॥ तथा नैषा तर्केण मतिरापनेया प्रोक्तान्येनैव सुज्ञा

नाय प्रेष्टेति गुरूपदेशस्यावश्यकत्वं दर्शयति ततश्च तदभावदशायां सतोपि ब्रह्मात्मैक्यस्य
स्फुरणस्य तदुक्तसह[illegible]कारिविरहादेवानुपलंभसंभवान्न परोक्षयोग्यानुपलंभसंभव इत्य
र्थः॥ नन्वात्मन्यनुभूयमानजीवाभेदव[illegible]द्ब्रह्माभेदेपि सहकार्यपेक्षाभावान्नदभावादेव तदु
पलंभसंभव इत्यत [illegible] आह तस्य कृतीनामन्यपरत्वमित्याशंक्य कर्तृत्वादिरूपजीव[illegible]त्वस्य मनो
मात्रग्राह्यत्वेनात्मनि तद्विशिष्टाभेदोपलंभेपि तदुपलक्षित सर्वोपप्लवरहित सच्चिदानंद
घनप्रत्यक् ब्रह्माभेदस्य वेदांततात्पर्यगोचरस्याध्य[illegible]वसायरूपानुभवविशेषमनो
मात्रस्य सामर्थ्याभावाच्छ्रवणाद्यपेक्षामुक्तेत्याह॥ नच जीवाभेदइत्यादिना॥ अन्या

॥ नच जीवाभेदइव तस्मिन् विद्यमानब्रह्माभेदेपि सहकार्यंतरापेक्षा मनसो
न स्यादिति वाच्यं॥ जीवत्वादेर्मनोमात्रयोग्यतया तद्विशिष्टाभेदस्य तावन्मात्र
योग्यत्वेपि सर्वात्मत्वयोग्य[illegible]त्वादेस्तदयोग्यतया तदात्मब्रह्माभेदे सहकार्यंत
रापेक्षोपपत्तेः॥ अन्यथा जीवेऽदृष्टवदनुपलंभात्सोपि न स्यात्॥ [illegible]

कारेणाभेदानुभवेप्यन्याकाराभेदोपलंभाभावमात्रान्नास्य ततो भेदपरमतेबाधोमाह॥ क
अन्यथेति॥ मनोमात्रेणात्मनि जीवाभेदानुभवेपि अहमेव[illegible]ती दुष्प्रती वेत्येव माका
रानुभवाभावात् तद्भेदानुभवप्रसंगेनात्मनः पापाद्याश्रयत्विल्लत्वेन नित्यमुक्तता स्या
दित्यर्थः॥ ननु सहकार्यभावादागंतुकोपलंभाभावेपि स्वप्रकाशाभेदवादे स्वत एवो
पलंभः [illegible]
[illegible]

39

मे. धि. सटि.

॥२१॥

राम

=अपि च तमसा घटस्येव माययापहृतज्ञानाः =१

कथं न भवेदित्याशंक्याह ॥ अपि चेति ॥ इंद्रियसन्निकर्षे सत्यपि तमसा घटस्येवाभेदस्यापि
तत्त्वमस्यादिप्रयोजकानाद्यनिर्वचनीयाज्ञानेनावृतत्वात्स्वप्रकाशचिद्रूपे तस्मिन्न तत्त्व
न्यायादिविरो[illegible]ध्युपलंभाभावरूपानुपलंभसंभवान्नाभेदसत्त्वस्य तद्विरोधि[illegible]त्य
र्थः ॥ उक्तावरणे किं प्रमाणमिति वीक्षायामाह ॥ माययेत्यादिना ॥ अनिर्वचनीयाज्ञा
नमेव मयान वस्त्वंतरमित्याशयेन भगवद्वचनांतरमुदाहरति ॥ अज्ञानेनेति ॥ विष्णु
पुराणे ॥ तद्भावभावनापन्नस्ततोऽसौ [illegible] परमात्मना ॥ भवत्यभेदीति ज्ञानदशायां परमात्मा
भेदप्राप्तिमभिधाय तर्हि ज्ञानात्प्राक् भेद एवेति शंकां निराकर्तुं भेदश्च तस्याज्ञान

॥ अज्ञानेनावृतं ज्ञानं तेन मुह्यंति जंतवः ॥ भवत्यभेदी भेदश्च तस्याज्ञानकृ
तो भवेदित्यादि [illegible]स्मृत्या ॥ नीहारेण प्रावृता जल्प्या चा ॥ अन्येते न हि प्रत्यक्ष
इत्यादिश्रुत्या चाज्ञानेनावृतत्वे प्रतीते जीवब्रह्माभेदस्य नानुपलंभः सत्त्ववि

रूत इत्युक्तं ॥ न हि वस्तुतः अन्यस्यान्यात्मत्वं ज्ञानसहस्रेणापि भवति ततश्च भेदप्रति
भासः प्रागविद्याविलसितोऽभेदश्च तिरोहित इति गम्यते अनंतरं तर्हि ज्ञाने नष्टे पुनरपि ति
भेदोन्मज्जनमाशंक्याभेदनिदानाज्ञानस्य निर्लेपं [illegible] नष्टत्वान्न पुनस्तत्प्रसक्ति
रित्युक्तं ॥ विभेदजनकेऽज्ञाने नाशमात्यंतिकं गते आत्मनो ब्रह्मणो भेदमसंतं कः क
रिष्यतीति ॥ तथा श्रुतेर्थं यस्तीयेतन प्रतीयेत चात्मनीत्यादिनावरणविक्षेपहेतु
मायाविषयास्मा नीरादिपदार्थः ॥ प्रसिद्धनीहारस्येत्त्वविरोधित्वावभासकत्वमं कृष्ण

उत्ताच्छादकत्वदर्शनेनास्तु तौ नीहारपदेन स्वविरोधित्वावभासकंचैतन्यात्मब्रह्मणाव
रकमज्ञानंविवक्षितंमुख्यनीहारस्यात्मस्वरूपावरकत्वादेरसंभवात् तत्कृतावरण
विक्षेपौप्रावृताजल्प्याश्चेत्यन्वयः अहरहःसुषुप्तिसमयेब्रह्मस्वरूपविरुद्धरूपाद
र्शनेनप्रसंगभिन्नस्वप्रकाशब्रह्मसंपत्तौसत्यामपितदलाभे हेतुरुच्यते ऋतेऽस्मा
न्नृतेनहिप्रत्यूढाइति॥अनृतमनिर्वचनीयमज्ञानंतेनस्वरूपावृतब्रह्मणस्तद
प्यावृतत्वाद्विक्षेपाभावेपिनतत्प्राप्तिरित्यर्थः॥एवंतावन्मनसःप्रत्यक्ब्रह्माभे
दग्रहणयोग्यत्वंस्वीकृत्यसत्यपितस्मिन्सहकारिविरहात्तत्सत्त्वंनानुपलंभ

किंचमनोनजीवब्रह्माभेदयोग्यं॥यन्मनसानमनुतइत्यादिश्रुतेः॥किंतुतं
त्वौपनिषदंपुरुषंसर्वेवेदायत्पदमामनन्तीत्यादिश्रुत्यावेदैकगम्यंब्रह्मेति
नमनसोऽनुपलंभात्तदभावसिद्धिः॥

=ऽद्धर्मादिव ३

विरोधीस्यान्नेत्यंशंसंप्रति — स्वीकृतंपरित्यजन्वेदांतारंभात्प्राक्तद्ग्राहकाभावे
नैवतदनुपलंभसंभवान्नयोग्यानुपलं — भोऽस्तीत्याह॥किंचमनइति॥नमनुतइत्या
दिश्रुतेरित्य — त्रादिपदेननावेदविन्मनुतेतंबृहंतमित्यादिगृह्यते।यत्पदमामनन्तीत्या
दिश्रु — त्येत्यत्रादिपदेनवेदांतविज्ञानसुनिश्चितार्थाः वेदैश्चसर्वैरहमेववेद्यइत्या
दिर्गृह्यते।मनसइतिपंचमी अयोग्यान्मनसोऽनुपलंभमात्रेणात्मनिपरमतेधर्मा
द्यदृष्टस्येवतस्यब्रह्माभेदस्यापिसि — द्धेरभावोनेत्यर्थः॥नचयन्मनसानमनुतइत्येन

41

मो॰ धि॰ सटि॰

॥२२॥

राम

तदसूक्ष्ममनोविषयमिति वाच्यं॥ तथाप्यस्मदादेस्तदनुपलंभसंभवादिति भावः॥ पुन
रपि जीवेश्वरात्भेदग्रहयोग्यत्वं मनसोऽप्युपेत्य योग्यानुपलब्धिमेव निराकरोति॥ कि
चेति॥ किमात्मनीश्वरस्य विशिष्टाभेदानुपलंभस्तद्भेदसाधकयुतोत्ममात्राभेदानु
पलंभः॥ आद्येपि किमीश्वरत्वं जातिरुत घण्टकादिकर्तृकत्वं नित्यज्ञानवत्वं वा नि
त्यसर्वज्ञानवत्वं वेति विकल्प्यमतिप्रस्याह॥ कि [illegible] मिदमिति॥ आद्यं निराकरोति॥
न तावज्जातिरिति॥ न च ब्रह्मविष्ण्वादिभेदेनेश्वरनानात्वाद्य [illegible] भेदोपि सिद्ध इति
वाच्यं॥ नानात्वे सति तेषामीश्वरत्वायोगात् यतो वा इमानि भूतानि जायंत इत्यादिने

क्रिः

॥ किंच॥ किमिदमीश्वरत्वं यद्विशिष्टभेदानुपलंभोऽद्वैदमित्युच्यते॥ न ताव
ज्जातिः॥ एकव्यक्तौ तदभावात्॥ न च ब्रह्मादिकेश्वरसाधारणेश्वरत्वं जाति
रिति वाच्यं॥ समयभेदेन चेतनमात्रे तदस्तीत्यात्मत्वाद्भेदानुपपत्तेः॥ श्रीराम

कस्यैव सृष्ट्यादिकर्तृत्वाभिधानात् कर्तृब्रह्मादिभेदानुपपत्तेः॥ स ब्रह्मा स शि
व इत्यादिश्रुतिविरोधाच्च न वास्तवस्तद्भेदः औपाधिकस्तु व्यक्तिभेदो न जातिरूप
पादकः गगनादावदर्शनादिति भावः॥ तथापि देवमनुष्यादीश्व[illegible]राणामिं द्र
प्रभृतीनां परमेश्वरस्य च परस्परं भेदात् कथमीश्वरत्वं न जातिरित्याशंक्यते
षामेश्वर्यस्यागंतुकत्वादागंतुकस्य च जातित्वायोगात् सर्वजीवेषु पर्यायेणापेक्षितैके
श्वर्यसंभवेनात्मत्वेन तुल्यव्यक्तिकत्वाच्च नेश्वरत्वं जातिरित्याह॥ न च द्वौ कि केश्वरौ

रूपम

लौकिकेश्वरसाधारणेश्वरत्वजातिस्वीकारेऽपि लौकिकेश्वराणां तद्विशिष्टात्माभेदानुपलंभा
भावान्नेषामीश्वराद्भेदो न सिध्येदित्याह ॥ लौकिकेश्वराणामिति ॥ द्वितीयमपवदति ॥ नापि
घणुकादीति ॥ जीवं प्रति घणुकादेरतीन्द्रियतया तत्कर्तृत्वस्य तद्भिन्नेश्वरे सत्वेऽपि अती
न्द्रियत्वान्न तद्विशिष्टाभेदस्य सतोऽपि धर्मादिविशिष्टाभेदवदनुपलंभोपपत्तेर्न तत्तदभावसि
ते५ द्धिरित्यर्थः ॥ तृतीयं निराकरोति ॥ नापीति ॥ परमे जीवे सत्यपि नित्यत्वे तस्य प्रत्यक्षत्वायोग्य
त्वात् तद्विशिष्टाभेदाननुभववत् तद्भिन्नेश्वरे सत्यपि नित्यज्ञाने तन्नित्यत्वस्यानुभवायो
ग्यत्वान्नित्यज्ञानवदभेदस्य सतोऽप्यनुपलंभोपपत्तिरित्यर्थः ॥ चतुर्थमपाकरोति ॥ नापिस

लौकिकेश्वराणां तद्भेदाननुभवप्रसंगाच्च ॥ नापि घणुकादिकर्तृत्वं । तद्विशिष्टस्या
तीन्द्रियतया तदभेदस्य सतोऽप्यनुपलंभोपपत्तेः । नापि नित्यज्ञानवत्वं । स्वनित्यताया
इव ज्ञाननित्य[illegible]ताया अपि प्रत्यक्षायोग्यत्वात् ॥ नापि सर्वज्ञ[illegible]त्वं । सर्वविषयज्ञा
वत्व नमात्रस्य जीवेऽप्यनुभवात् ॥ नित्यसर्वज्ञत्वं नानुभूयत इति चेन्न । जीवज्ञाने नित्यतायाः म

र्वज्ञत्वमिति ॥ सर्वं वेद्यमित्यादिरूपस्य शब्दादिजनितसर्वविषयज्ञानमात्रस्य जीवे
दर्शनान्न तद्भेदानुपलंभोऽस्तीत्यर्थः ॥ न च सर्वविषयप्रत्यक्षवत्वं तदिति वाच्यं । यो
गिषु तस्याप्यनुभवादिति भावः । पंचममुत्थापयति ॥ नित्यसर्वज्ञत्वमिति ॥ जीवज्ञा
नस्योक्तविधया सर्वविषयत्वे सति परमतेऽविनाशी वारेऽयमात्मानुच्छित्तिधर्मा इत्या
दिवचनात् तस्य नित्यत्वस्यापि संभवान्नित्यसर्वज्ञत्वमात्मन्यनुभवे ततद्भेदानुपलंभो

गो॰ धि॰ सटि॰

॥२३॥

राम

ननु नित्यसर्वविषयापरोक्षज्ञानवत्त्वमीश्वरत्वमित्याशंक्यपरमतेज्ञानस्यस्वरूपातिरिक्तवि
षयसंबंधाभावान्नियामकाभावेनसर्वस्यसर्वविषयत्वापत्त्योक्तरीत्याज्ञानेनित्यत्वस्त्वम
वतोघटादिज्ञानदशायांनित्यसर्वविषयापरोक्षज्ञानवत्त्वस्याप्यनुभवान्नादनुपलंभासि
द्धेर्नजीवेशा भेदग्रहसिद्धिरित्याह॥ज्ञानार्थयोरिति॥मास्तुतदाभेदग्रहइत्याशंक्या
ह॥अस्तिचेति॥अपिचसर्वगतात्मवादेशरीराद्यवच्छिन्नात्मप्रदेशतद्धर्मयोरेवप्र
त्यक्षयोग्यत्वान्नित्यसर्वज्ञत्वादिरूपेश्वरत्वस्यतदवच्छिन्नात्मप्रदेशावृत्तित्वेनाप्य

॥ज्ञानार्थयोःस्वरूपमात्रंसंबंधश्चेत्सर्वज्ञानेसर्वविषयमेवेतिनिश्चयपदशायां
तदनुपलंभाभावेनभेदग्रहोनस्यात्॥अस्तिचतदापिसः॥किंच।ज्ञानस्याव्या
प्यवृत्तित्वात्सर्वज्ञत्वादेजीवात्मप्रदेशावृत्तित्वेनापिअनुपलंभोपपत्तेर्नतद
धिकरणभेदग्रहःसंभवति॥नहिमूलाग्रावच्छेदेनाग्रत्वेनानुभूयतइतितदुभ
याधिकरणभेदप्रमासंभवति॥रामरामरामरामरामरामरामरामरामरामरा

नुपलंभोपपत्तिः नचात्रिस्यात्मविशेषधर्माणामेवप्रदेशावृत्तित्वंलाघवेनविभुवि
त्यादार शेषगुणमात्रस्यैवतथात्वमितितदधिकरणाभेदस्यसत्त्वेप्यनुपलंभसंभवान्नेततत
त्वाद्भेदसिद्धिरित्याह॥किंचज्ञानस्येति॥अत्रदृष्टांतमाह॥नहिमूलेति॥मूलाग्रप्रदे
शेचक्षुःसन्निकर्षान्तदवच्छेनवृक्षानुभवेपितत्राग्रत्वस्याभावादेवानुपलंभोप
पत्तेतद्विशिष्टवृक्षाभेदानुपलंभसंभवान्नततोमूलाग्रयोर्वृक्षभेदसिद्धिः एवमग्रे

[illegible]

रुध्म

ननु मूलावच्छेदेन वृक्षोऽग्रत्वावच्छिन्नवृक्षाभेदानुपलंभेपि वृक्षमात्राभेदोपलंभात्तेन रूपे
ण नभेद इत्याशंक्य जीवेपि चिदात्माभेदानुपलंभाभावान्न तद्रूपेश्वराभेदासिद्धिरित्या
ह ॥ वृक्षाभेदवदिति ॥ एतेनात्ममात्राभेदानुपलंभो जीवे परभेदसाधक इति कल्पोप्य
पास्तो वेदितव्यः ॥ नन्वाम्रमूलाग्रमेको वृक्ष इति मूलाग्रयोरेकवृक्षसंबंधावगमान्मूलाव
च्छेदेनाग्रत्वानुपलंभमात्रान्न वृक्षभेदसिद्धिः जीवत्वेश्वरत्वयोस्तु नैक धर्मिसं
बंधोवभासते ततश्च जीवत्वावच्छेदेन सर्वज्ञत्वाद्यनुपलंभो बाधकोऽतुर्मिभेदसाधकः भावाद्

दव वृक्षाभेदाद्भेदमात्रस्यानुपलंभाभावात् ॥ तत्रैकवृत्तित्वमनुभूयते यथा न तथात्रे
ति चेत्तन्न संशयदशायामपि योग्यानुपलंभासंभवेन स्वस्य विभुत्वविशिष्टभेद
वत्तादेदस्य ग्रहासंभवात् ॥

क इत्याशंकते ॥ तत्रैक व वृत्तित्वमिति ॥ आत्मनो वियदादिवद्विभुत्वात् द्रव्यत्वापरजा
तिरहितत्वे सति वस्तुत्वात् जीवात्मपरमात्मभेदायोगेन जीवत्वेश्वरत्वाधिकरणाभेदनि द२
श्चयो स्येव उक्तयुक्त्यनवतारदशायामपीश्वरत्वस्य जीवे विभुत्वादिवद्योग्यत्वादनु
पलंभः किंवा अन्यधर्मत्वादिति साधकबाधकाभावेन संशयस्यैवावसरो न तद्धर्मि
भेदनिश्चयस्य इति तथात्मनि विभुत्वादिवैशिष्ट्यस्य सर्वमूर्तद्रव्यसंयोगसमवायादि
रूपस्यानवगमादात्मनि तद्विशिष्टाभेदानुपलंभात्तद्देहपात इत्याशयेनाह ॥ तत्सं
शयदशायामपीति ॥ तस्माज्जीवेश्वराभेदे योग्यानुपलंभाभावात्

दभावरूपतद्भेदेन प्रत्यक्षप्रमाणसंभव इति भावः॥ एवमयोग्यानुपलब्धिकमित्येतत्प्रपंच्य सोपाधिकस्थाभेदो यमित्येतत्प्रपंचयितुं आपाततः भेदप्रतिभासं स्वीकरोति॥ किंचाहमिति॥ जीवात्मा किं स्वरूपेण विभुरुताणुर्मध्यमपरिमाणो वा॥ आद्ये अहमिहैवास्मि सदने इति प्रतिभासमानपरिच्छेदस्य तस्मिन्स्वाभाविकत्वायोगात् परिच्छिन्नाहंकारशबलात्मन एवाहं प्रत्ययालंबनतया तत्र परिच्छेदप्रतिभास औपाधिक उपपादनीयः एवं चाहमीश्वरो नेत्यहंप्रत्ययावसेयभेदस्योपाधिशबलात्मनिष्ठतया तत्प्रतिभासो रक्तोयं स्फटिको न शुक्ल इति भासवदाभास इत्यर्थः॥ द्वितीयस्त्वनुपपन्न इ

१ प्रति

किंचाहमिहेति परिच्छिन्नतयाऽनुभूयमाने जीवे भेदोनुभूयते नाहमीश्वर इति न च निरुपाध्यात्मनः परिच्छेदः संभवति॥ अणुत्वे आत्मनः सर्वशरीरव्यापिसुखाद्युपलंभप्रसंगात्॥ विरुद्धदेशद्वये युगपत्प्रयत्नाद्युपलंभप्रसंगात्

त्याह॥ अणुत्वइति॥ नन्वणुत्वात्मन एकदेशस्थत्वेपि तद्गुणानां गंधादिवच्छरीरादिव्यापितोपपन्नेति चेन्न गुणानां गुणिव्यतिरेकेण रूपादिवद्देशांतरव्यापित्वायोगात् जडवादिनां वैतन्याश्रयस्यैव गंधादेर्देशांतरव्यापित्वेनादन्यथैकशरीरसंबंधिकरद्वयेप्येकैकांगुलिमात्रे युगपत्प्रयत्नद्वयस्यैकस्मिन्नात्मनि असंभवात्। न चैकशरीरेऽनेक आत्मानो युगपत्संभवंति तत्र युगपच्चद्वयम

तृतीयोप्यनुपपन्न इत्याह॥ स्वाभाविकेति॥ अनित्यत्वमुत्पत्त्यादिमत्त्वं [illegible] ततस्य तृत

रादिर हानादिपदार्थः॥ आत्मनः स्वतोणुत्वमध्यमपरिमाणत्वनिरासफलमाह॥ ततो घटाका

दि दिवदिति॥ औपाधिकस्यापि सत्यत्वं मन्वानं प्रत्याह॥ नतस्येति॥ [illegible] यः पिंडादौ पीतघ खा

गधत्वादेर्यावद्द्रव्यभाविमुक्तत्वानुपलब्ध्यादिविरोधेन सत्यत्वानुपपत्तेः प्रतिबिंबत्वादि

ष्वोपाधिकस्य मिथ्यात्वदर्शनाच्च औपाधिकभेदस्य न सत्यतेत्यर्थः॥ तर्हि अनौपाधिक ए

[illegible] स्य तस्य परिच्छिन्नोपाधिपरामर्शे सत्येव प्रतिभासान्नास्य स्वाभादि [illegible]

॥ स्वाभाविकमध्यमपरिमाणेचानित्यत्वाद्यापत्तिः अनंतपरिमाणेच गगनवन्न

सजातीयभेद इत्यात्मैक एव॥ ततो घटाकाशादिवदौपाधिक एव परिच्छेद इति

ततस्तद्भेदोऽपि औपाधिक [illegible] इति॥ न तस्य सत्यत्वं॥ न वा निरुपाधिकता॥

वात्मभेदोस्ति स्याद्वा स्य तस्य परिच्छिन्नोपाधिपरामर्शे सत्येव प्रतिभासान्नास्य स्वा

वा भाविकतेत्याह॥ नैनिरुपाधिकतेति॥ एवं तावत्परिच्छिन्नाहंकारद्वारकत्वात्म [illegible] न

एवाहंप्रत्ययप्रतिभासात्तत्सत्याप्यपरभेद आत्मनि परिच्छेदवत्तदुपाधिक एव न स्वा

भाविक इत्यर्थः॥ ननु दुःखादिधर्म्यहंकार एवाहमनुभवालंबनं स एवात्मा तदनालंबन

स्य घटादेरनात्मत्वनियमात् तस्मिंश्च स्वतः सर्वगते प्रतिभासमानः परिच्छेद एव शरीर

47

भे॰ धि॰ सटि

॥२५॥

राम

तादात्म्या[illegible]रोपनिबंधनस्तदुपाधिकः परभेदस्फुतत्र प्रतिभासमानस्तस्य परस्मा दभेदस्यासंभवात् स्वाभाविक एवेत्यात्मान्यथाहंकारस्यानात्मत्वं साधयति॥ अपि चे ति॥ दुःखादिसमसत्ताकस्तद्धर्मिप्रतियोगिसमसत्ताकात्मत्वप्रतियोगिकास्ति ताभाववान् चैतन्यविषयत्वात् घटवदिति प्रयोगो विवक्षितः तथा च किमहंकारोत: क रणं तदतिरिक्तो वा। आद्ये सिद्धसाधनं द्वितीये [illegible] बाधइत्यादेर्दोषस्यानवकाशः सि ध्यन्ते चिदात्मनि कल्पितात्मत्वप्रतियोगिकवास्तवाभावसत्त्वेपि तत्प्रतियोगिकतत्सम

॥ अपि चाहंकारोनात्मा दृश्यत्वात् घटवत्॥ न चाप्रयोजकत्वं लाघवेन दृश्यत्व स्यैवानात्मत्वेन व्याप्तत्वादिति [illegible] पक्षधर्मताबलादतिरिक्तात्मसिद्धिः॥ [illegible]

स्याद्रि[illegible]

सत्ताकाभावस्य घटादाविवाभावादनात्मत्वाभावः सिद्धः तद्वदहंकारेप्यर्थान्तरत्व वारणाय प्रतियोगिसमसत्ताकेत्यभावविशेषणं॥ नन्वनात्मत्वेन दृश्यत्वं प्रयोजकं किंतु

योगि दर्शनानात्मत्वघटादावनात्मनि नियमेन दर्शनादतोऽप्रयोजको हेतुरित्याशंक्य

वेन तस्याभावद्युति [illegible] तथा गुरुत्वाल्लाघवे दृश्यत्वमेव तद्व्याप्यत्वेन प्रयोजक [illegible] मित्या ह॥ न चाप्रयोजकत्वमिति॥ अहंकारस्यानात्मत्वेपि कथं तदतिरिक्तात्मसिद्धिरित्या शंक्यानात्मनि पक्षे दृश्यत्वहेतोरतिरिक्तद्रष्टारं विनानुपपत्तेरर्थान्तात्मसिद्धिरित्याह॥

दृश्य

ननु अहंकारातिरिक्तात्मकल्पने गौरवात्तस्यैव स्वदृष्टत्वकल्पने लाघवं तदतिरिक्तात्मनि दृश्यत्वहेतोर्व्यभिचारश्च अदृश्यत्वे वा तदसिद्धिरित्या शंक्याह ॥ सच्चेति ॥
परेषामपितावदंतःकरणातिरिक्तात्मासंमतः ततो नालौकिकात्मकल्पनागौरवं प्रसक्तं तत्तस्य मनसः प्रमाणत्वप्रसंगसमये दुःखादेः स्वप्नादेश्च साक्षित्वेन प्रमाणयुक्तिभ्यां साधिते कनित्यस्वप्रकाशानुभवमात्रत्वकल्पना दात्मनोनात्वस्याभावाल्लाघवं परमते तु तत्कल्पनीयमिति गौरवं स्वप्रकाशानुभवात्मनि स्वतः सिद्धे तद्दि

सच्च सुखादिसाधकः स्वप्रकाशो नित्यानुभवः प्रागुक्तः स एवेति न दृश्यः ॥
तथा चानात्माहंकार — विशिष्ट एव भिन्नतया प्रतीयत इति नाहमीश्वर इ
क ति प्रत्यक्षं नन्वि — रूपाधिं जीवभेदे प्रमाणं ॥ श्रीरामजयरामजयजयराम ॥

वपरूपदृश्यत्वाभावान्न व्यभिचारो न वा तदसिद्धिरिति भावः ॥ प्रश्नोत्तम
हंकारे परिच्छिन्न देह तादात्म्यारोपादेव परिच्छेदावभास इति तदप्ययुक्तं उक्तेविध्यपाहंकारस्यो त्पत्त्यादिमतः सर्वगतत्वे प्रमाणाभावात्तत्र प्रतिभासमान परिच्छेदस्य स्वाभाविकत्वोपपत्तेस्तस्य सः स्वाभाविको न त्वौ पाधिकः ॥ आत्मनि तु तदुपाधिक एव स प्रतिभासते एवं भेदोपि तदुपाधिक एवात्मनि प्रतिभासतो न स्वाभाविक इत्युपसंहरति ॥ तथा चेति ॥ श्रीकृष्णपरब्रह्मणे नमः ॥

भे॰ धि॰ स॰

॥२६॥

राम

एवं तावन्मानाभावादप्युक्तेत्यग्रेतिजीवेशाभेदे सामान्येन सर्वप्रमाणाभावं प्रतिज्ञाय तत्र प्र
सक्ताभाव आक्षेपसमाधानाभ्यामुपपादितः इदानीमनुमानाभावं प्रपञ्चयितुं वक्ष्यमा
णानु[illegible]माने दूषणगणं संगृह्णा[illegible]ति ॥ सिद्धसाध्यत्वतइत्यादिना ॥ भेदो जीवेशाभे
दो नानुमानस्य गोचर इत्यर्थादनुमानं ॥ न प्रमाणमित्यन्वयः तत्र हेतवः ५ सिद्धसा
ध्यत्वादयः ते चानंतरमेव स्पष्टी[illegible] करिष्यते ॥ भेदो नानुमानस्य गोचर इत्येतद्वि
वृणोति ॥ अनुमानमपीति ॥ जीवपरभेदसत्त्वे किं जीवधर्मिकानुमानं प्रमाणं
ब्रह्मधर्मिकानुमानं वा । आद्येपि किं जीवे ब्रह्मभेदमात्रं साध्यं तेनाबाध्यत्ववि

सिद्धसाध्यत्वतो भेदो व्याप्यत्वासिद्धतो[illegible]वा ॥ बाधप्रकाइत्यौपाधित्वान्ना
नुमानस्य गोचरः ॥ ८ ॥ अनुमानमपि न जीवपरभेदे प्रमाणं ॥ तत्र न तावत्
जीवो ब्रह्मधर्मिकभेदप्रतियोगी ब्रह्मप्रतियोगिकभेदवान्वा पदार्थत्वादस
र्वज्ञत्वाद्घटवदित्यनुमानं प्रमाणं सिद्धसाधनत्वात् ॥

शिष्टो वा पारमार्थिको नोपाधिको वा तद्भेदः साध्य इति विकल्पानभिप्रेत्याद्यमन
घ सिद्धसाध्यत्वेन निराकरोति ॥ तत्र न तावदित्यादिना ॥ पद्यत इति पदं ब्रह्म तदर्थत्वो
तच्छेषत्वान्तन्नियम्यत्वादिति यावत् ॥ ततश्च जीवस्य ब्रह्मातिरिक्तत्वे तदुपपत्तिर्बा
धिकापदार्थत्वादित्यस्य ब्रह्मणि न व्यभिचारस्तत्र यद्यपि नियम्य[illegible]त्वमात्र[illegible]म
व्यभिचारि तथापि तन्नियामकसापेक्षं तेन विना न पर्यवस्यतीति ब्रह्मनियम्यत्वादि
त्यन्वेतीति द्रष्टव्यं सिद्धसाधनत्वादिति जीवब्रह्मणोः पर

नु२

रूघ

+ वाच्यं ॥ दृष्टान्ते साध्याप्रसिद्धेर्व्याप्त्यसिद्धेः ॥ अत एव पारमार्थिकभेदवानिति साध्यं निरस्तं ॥ + २

स्वप्रतियोगिकाविघटकव्यावहारिकभेदस्य सिद्धान्तिनापि स्वीकारादित्यर्थः ॥ एतेन जीवस्य ब्रह्मणो भेदाभावेन तन्नियम्यत्वानुपपत्तिरपि प्रत्युक्ता ॥ नियम्यत्वादेः स्वसमानसत्ताकनियंत्रादिभेदसापेक्षत्वात्तस्य च स्वीकारादिति द्वितीयं निराकरोति ॥ न चेति ॥ अस्य वाच्यमित्यनेनान्वयः ॥ स्वज्ञानाबाध्यभेदस्य साध्यत्वेपि कथं सिद्धसाधनतापरिहार इत्याशंक्य शंकितेवाह ॥ ज्ञानाबाध्येति ॥ तत्र किं स्वपदोक्तजीवपदवाच्य कर्त्रादिरूपात्मज्ञानाबाध्यत्वं भेदसाध्यमुत तदुपलक्षिताखंडचिदात्मज्ञानाबाध्यत्वं ज्ञानमात्राबाध्यत्वं वा आद्ये व्यावहारिकानिर्वचनीयभेदस्यापि संसारिजीवज्ञानाबाध्य

॥ न च स्वज्ञानाबाध्यभेदवानिति साध्यं ॥ ज्ञानाबाध्यभेदस्य परमार्थ इति न सिद्धसाधन मिति वाच्यं ॥ असत्यस्यापि भेदस्य घटादिज्ञानेनेव जीवज्ञानेनाप्यबाध्यत्वात् ॥ न चात्म ज्ञानाबाध्यत्वं तेन विवक्षितमिति ॥ न चानौपाधिकभेदः साध्यते ॥ दृष्टान्तेपि तत्सत्वात् ॥

त्वेनेष्टतया सिद्धसाधनमित्याह ॥ असत्यस्यापीति ॥ द्वितीयतृतीयौ तु सङ्कोचे कोक्त व्याप्त्यसिद्धत्वेनेष्टतया सिद्धसाधनमित्याह ॥ न च आत्मज्ञानेति ॥ अत्र चेन तृतीयकल्पनिरासः समुच्चीयते सव्वमवतारयन्निराकरोति ॥ न च आत्मज्ञानेति ॥ अत्र चेन तृतीयकल्पस्य निरासः समुच्चीयते स्वाद्वैतस्य जडतया शुद्धचिदात्मन्यविद्याविलसितत्वेन तज्ज्ञानबाध्यत्वस्वीकारात् तज्ज्ञानाबाध्यस्य ज्ञानमात्राबाध्यस्य वा भेदस्य काप्यनभ्युपगमात् । घटादावपि व्याप्यभावेन व्याप्त्यसिद्धिरित्यर्थः ॥ पारमार्थिकोभेदः साध्य इति तृतीयोपि व्याप्त्यसिद्धत्वादेवायुक्त इत्याह ॥ अत एवेति ॥ चतुर्थमपवदति ॥ न चानौपाधिकेति ॥ अत्रा न चेत्यस्य वाच्यमित्यनन्तरेणान्वयः ॥ यत्राभेदः प्रामाणिकः तत्र भेद औपाधिक इति हि स्थितिः ततश्च घटादिभेदे निरुपाधिकत्वाभावसंमतत्वा

भे. धि. सत.

॥२७॥

राम

नु जीवैक्यभेदस्य निरुपाधिकत्वेऽपि घटादिभेदवन्मिथ्यात्वोपपत्तेः सिद्धसाधनता तत्रापि तदवस्थैवेत्याशं
क्य तस्यैवाभावमाह ॥ जीवेशेति ॥ अनादेर्जीवेशभेदस्याविद्याकृतोपाधिकत्वाभावे सिद्धे तत्त्वज्ञा
नादविद्यादेर्निवृत्तावपि तत्कार्यघटादिभेदवत्ततस्तन्निवृत्तेरयोगात्तत्साध्यत्वसिद्धिरित्याशयः
अस्यापि बाध्यत्वे हेतुमाह ॥ नाहमीश्वर इति ॥ अत्र किं नाहमीश्वर इत्यनुभूयमानस्य भेदस्य
निरुपाधिकत्वं साध्यते उत तदतिरिक्तस्य । नाद्यः अहंप्रत्ययस्यानात्माहंकारावलम्बित्वेन विष
यत्वोपपादनात् तस्यात्माभेदस्य तदुपाधिकत्वनिश्चयेन तन्निरुपाधिकस्य बाधितत्वा
त् न द्वितीयः तस्योपलब्ध्ययोग्यत्वेऽनुपलम्भविरोधात् तस्य तदयोग्यत्वे च हेतोरप्रयोजकत्वं स

॥ जीवेशयोरौपाधिकभेदसिद्धौ केवलस्यैव भेदः सिध्यतीति सत्यभेद इति वाच्यं ॥
नाहमीश्वर इति भेदस्यौपाधिकत्वेनाहंकारजीवभेदानुभवेन च बाधितत्वा
त् ॥ ननु ब्रह्मजीवप्रतियोगिकधर्मिज्ञानाबाध्यभेदवत्पदार्थत्वादसंसारित्वात्
घटवत् तत्र भेदस्य ब्रह्मज्ञानाबाध्यत्वेन सत्त्वमिति चेत् ॥ राम ॥

संसारित्वासंसारित्वादिव्यवस्थापकौपाधिकदृष्टभेदादनुपपत्तेरिति भावः ॥ इदा
नीं ब्रह्मपक्षकानुमानं प्रयुज्य सिद्धसाध्यत्वादिपरिहारं शंकते ॥ ननु ब्रह्मेति ॥ अत्र प
दार्थत्वादिति यथाश्रुत एव हेतुः न च जीवे व्यभिचारः तस्यापि जीवान्तरप्रतियोगिक
भेदोपगमेन पक्षसमत्वात् ॥ ननूपाधिधर्मि घटादिज्ञानाबाध्यजीवप्रतियोगिकभेदस्य ब्र
णि सिद्धत्वान्नापि स्वीकारात् सिद्धसाधनमित्याशंक्याह ॥ तत्रेति ॥ धर्मिपदेन समभि
व्याहृतभेदधर्मिण एव विवक्षितत्वात् प्रतियोगिवच्च न ब्रह्मणस्तद्धर्मित्वावगमात् धर्मिकसं रूप

=पदेनजीव=१

धर्मिप्रतियोगिकभेदधर्मिविवक्षायामपि किंयत्किंचित्तद्धर्मिज्ञानाबाध्यत्वं तत्र सिसाधयिषितं। यावत्तद्धर्मिज्ञानाबाध्यत्वं वा। ब्रह्मज्ञानाबाध्यत्वं वा। नाद्यः स्वरूपातिरिक्तभेदवादिमते ब्रह्मणि घटादौ च जीवभेदस्यै ——— कत्वात् तद्धर्मिघटज्ञानाबाध्यजीवभेदस्य ब्रह्मणि सिद्धांतिनापि स्वीकारेणात्रापि सिद्धसाधनत्वादिति दूषयति॥ चप
नजीवप्रतियोगिकेति॥ द्वितीयं निराकरोति॥ नैयावदिति॥ दृष्टांते प्यभावादिति। घटगतजीवभेदस्यापि स्वधर्मिब्रह्मज्ञानबाध्यत्वस्वीकारेण यावद्धर्मिज्ञानाबाध्यत्वस्या

नाजीवप्रतियोगिकभेदस्य ब्रह्मणि घटादौ चैकत्वेन स्वधर्मिघटज्ञानाबाध्यतया सिद्धसाधनात्॥ नच यावद्धर्मिज्ञानाबाध्यत्वं भेदविशेषणमिति वाच्यं॥
दृष्टांते तदभावात्॥ नच स्वज्ञानाबाध्येति विशेषणान्नोक्तदोष इति वाच्यं॥

संप्रतिपत्तेरत्रापि व्याप्यत्वासिद्धिरित्यर्थः॥ अत एव न तृतीयोपीति भावः॥ ननु ब्रह्मजीवप्रतियोगिकधर्मिज्ञानाबाध्यभेदवदिति प्रतिज्ञायां धर्मिपदं सत्कांत
त्स्थाने स्वपदं प्रयुज्यते तस्य समभिव्याहृतपरत्वस्य व्युत्पत्तिसिद्धत्वात् प्रतिज्ञा
२पक्ष यां पक्षपरत्वमुदाहरणे तु घटोपरत्वमिति न सिद्धसाधनं न वा व्याप्यत्वादि सिद्धिरिति नेत्याह॥ नच स्वज्ञानेति॥ प्रतिज्ञायां ब्रह्मपदसमभिव्याहृतस्वपदेन किं ब्रह्मेशादिपदवाच्यमनवच्छिन्नत्वं सर्वज्ञत्वादि विशिष्टं विवक्षितं तत्त्वात्तद्ज्ञाना
चि

=सिद्धेः। वेदांततात्पर्यगोचरब्रह्मपरत्वेच ब्रह्मशब्दस्य धर्मिग्राहकमानबाध्यो हेतोरः=२

॥२८॥ राम

बाध्यत्वंभेदेसाध्यतेउतात्रब्रह्मपदेन वेदांत तात्पर्यगोचरं निर्विशेषं सत्यज्ञानादिरूपं वस्तूलक्षयित्वा तत्समपि व्याहतस्वपदेनापितस्यरामरूपततज्ज्ञानो बाध्यत्वं साध्यते आद्येसिद्धसाध्यत्वं तदवस्थं तद्भेदेविशिष्टब्रह्मज्ञानाबाध्यत्वस्यासिद्धांतिनापिस्वीकारादित्याह॥ ब्रह्मादिपदेति॥ यत्किंचिद्धर्मविशिष्टत्वेन अपरिच्छिन्नत्वादिविशिष्टत्वेन हेतुनातद्विशिष्टज्ञानाबाध्यत्वेपी सएवार्थः। द्वितीयेतत्वमस्यादिवेदांतानां ब्रह्मादिपदलक्ष्यस्याद्वयानंदस्य प्रत्यग्बोधात्मजीवाभेदे तात्पर्यस्य समन्वयादित्वे

ब्रह्मादिपदवाच्यस्य ब्रह्मणो यत्किंचिद्धर्मविशिष्टत्वेन तद्ज्ञानाबाध्यत्वे पि भेदेसत्येवोसि [illegible] द्धिस्य॥ जत्वं सोपाधिः॥ [illegible]

त्रैर्निर्धारितत्वादत्राप्यनंतरं वक्ष्यमाण त्वाद्धर्मिग्राहकवेदांतबाधितविषयं जीवात् ब्रह्मणो [illegible] भेदानुमानमाभास इति संग्रहश्लोकोक्तं बाधमवतारयति॥ वेदांततात्पर्येति॥ किंच पक्षीकृतस्य वेदांततात्पर्यगोचरब्रह्मणो निर्विशेषत्वेन तत्र धर्ममात्राभावात् पदार्थत्वादिहेतोरसिद्धिरित्याह॥ हेतोरिति॥ किंच घटादे र्जडतया दृश्यत्वेन मिथ्यात्वात् तद्विषयज्ञानस्य घटतद्भेदहेतुत्वविषयानिवृत्तयोग्यत्वात् तत्रस्वज्ञानाबाध्यभेदवत्वं नाउपपद्यत इति जडत्वमुक्तं साध्यव्यापकं साधने व्यतिस्वप्रकाशात्मन्यभावात् साधनाव्यापकं चेति तस्य सोपाधिकत्वादयं हेत्वा-

ननुप्रमेयत्वातिरिक्तजडत्वाभावात्तस्य च केवलान्वयित्वात्साधनव्यापकत्वादिना नो
पाधित्वमित्याशंक्याह ॥ तत्राऽस्वप्रकाशत्वमिति ॥ ननु स्वप्रकाशत्वस्य गगनकम
लिनीकल्पत्वात्तदभावात्मकाऽस्वप्रकाशत्वमपि तादृशमेवेति नेत्याह ॥ स्वप्रकाशत्वं चे
ति ॥ स्वप्रकाशत्वं हि दिनेव स्वप्रकाशविषयत्वं स्वमहिम्नैव स्वसत्ताप्रकारकसंश
याद्यगोचरत्वं अत्रायं पुरुषः स्वयंज्योतिरात्मैवास्य ज्योतिरन्यदेव तद्विदितादित्या
दिश्रुत्या सुखमहमस्वाप्समिति परामर्शानुपपत्त्याऽन्यथावस्थात्रयेऽपि सत्ताप्रका

।तत्राऽस्वप्रकाशत्वं ॥ स्वप्रकाशत्वं चात्मनः श्रुतिन्यायसिद्धमिति न त
दसिद्धिर्न वा साधनव्यापकता ॥ सर्वेषां चोक्तहेतूनामप्रयोजकत्वं ॥
कल्पितभेदेनापि निखिललौकिकव्यवस्थितव्यवहारोपपत्तेः ॥

रकसंशयाभावानुपप साच मननसः प्रमाकरणत्वनिरासार्थमुक्तन्यायेन च सि
द्धत्वादोऽचतदभावरूपं जडत्वं सिद्धमित्यनवद्यमनुपाधिरित्यर्थः ॥ जीवस्य तोऽत्र
त्वभेदः स्वप्रतियोगिसत्ताबाध्यः असातत्सत्ताकत्वे सति भेदत्वात्सप्रतियोगिक
त्वाद्वा घटे पटप्रतियोगिकभेदवदित्यादिहेतूनां पूर्वोक्तानां च विपक्षे बाधकाभा
वात्संदिग्धानैकान्तिकतामप्याह ॥ सर्वेषां चेति ॥ चकारोऽनुक्तसमुच्चयार्थः जीवा-
नां परस्परमीश्वराच्च भेदाभावे स्वर्गनरकसंसारित्यादिव्यवस्थानुपपत्तिर्बाधिके त्या

भे· स·

॥२७॥

राम

अस्याप्यवस्थाया व्यावहारिकत्वान्नात्मद्वयभेदं विनानुपपत्तावपि न भेदस्य सत्त्वं विना काचिदनुपपत्तिरस्ति केवलव्यतिरेकाभावादिति भावः ॥ श्रुत्यर्थसमर्पकानुमानविशेषस्योपजीव्यश्रुतिविरोधः प्रागुक्तः संप्रति नान्योतोस्ति द्रष्टा एतत आत्मा तथाप्यमृतः तत्त्वमेव त्वमेव तत् अयमात्मा ब्रह्म तत्त्वमसीत्यादिभिर्निरपेक्षाभिरनन्यथाभावितयाप्रबलाभिः श्रुतिभिर्विरोधात्सर्वे हेतवो बाधितविषया इत्याह ॥ वक्ष्यमाणेति ॥ जीवेशाभेदविषयानुमाननिराकरणमुपसंहरति ॥ तस्मादिति ॥ ए

वक्ष्यमाणश्रुतिबाधकस्य ॥ तस्मान्नानुमानं भेदे प्रमाणं ॥ मानांतरप्रसिद्धत्वान्मिथ्यात्वादप्रयोजनात् ॥ श्रुत्यंतरविरोधाच्च न श्रुतिर्भेदगोचरा ॥१०॥

वं मानाभावादित्यत्र संगृहीतमनुमानप्रमाणाभावं प्रपंच्यागमप्रमाणाभावं प्रपंचयितुं जीवपरभेदस्यागमाप्रतिपाद्यत्वे हेतून् संगृह्णाति ॥ मानांतरेति ॥ अत्र भेदग्राहिप्रत्यक्षस्य प्रमाणत्वं परमतेनानूदितं न तु स्वसंमतत्वेन तस्य प्रमाणत्वस्य प्राङ्निरास्तत्वात् तथाचानुभवसिद्धत्वादिति तदर्थः ॥ अत एव नाहमीश्वर भेदप्रतीतिरस्तीति इति४ तद्विवरणसमये वक्ष्यति ॥ ऋतं पिबंतौ द्वा सुपर्णेत्यादिश्रुतिर्न जीवेशाभेदे प्रमाणं भेऽनुपलब्धेऽर्थे तत्प्रमाणमिति सूत्रार्थे जैमिन्यादिभिः श्रुतिप्रामाण्यस्य न्यायतो निर्धारितत्वेनान्यतोऽवगते भेदे तत्प्रामाण्यायोगात् श्रुत्यापि दुःखादिधर्मैः संसारि

त्

दृश्य

श्वरो नेत्यादिरूपेणैव भेदप्रतीतेस्तस्य चौपाधिकत्वेन मिथ्यात्वोपपादनादहंकारादतिरि
क्तस्य भेदस्य परेषामपि स्फ[..]त्यर्थत्वेनानभ्युपगमात् श्रुतिजन्यभेदज्ञानस्य स्वर्गापव
र्गादिव्यप्र[..]योजना[..]नंगतया श्रुतेरध्ययनविधिप्रापितप्रयोजनवत्त्वव्याघातात् मृ
त्योः स मृत्युमाप्नोति य इह नानेव पश्यतीत्यादिना भेदज्ञानाज्जन्ममरणाद्यनर्थस्ये
वृत्र चणाद्वक्ष्यमाणविधया भेदपरानेकश्रुतिविरोधाच्चेति श्लोकार्थः ॥ मानांतरप्र
सिद्धत्वादि सेतद्विवृणोति ॥ अस्तिहीति ॥ तर्हि तत एव भेदः सिद्ध इति मदिष्टसिद्धि

एवं श्रुतिरपि न भेदे प्रमाणं ॥ अस्ति हि श्रुतिप्रतिसंधानविरहिणामपि नाह
मीश्वर इति भेदप्रतीतिः ॥ परं तु स वर्णितरीत्या योग्यानुपलब्धेरभावाद्बिंबे
प्रतिबिंबे भेदवन्मायिकः साक्षिमात्रसिद्ध इति वयं ब्रूमः ॥ तत्प्रत्यानुभवसि
द्धेन श्रुतितात्पर्यं कल्पनीयं ॥ श्रुतितात्प[..]र्यं विना हि प्रमाणासावप्रवृत्तस्य

रिसारं व्याह ॥ परं तु स इति ॥ भेदे प्रत्यक्षप्रतिपन्नत्वमात्रं स्वीक्रियते तत्र श्रुति
प्रामाण्यकारणाय न तु तत्प्रमाणं तदसंभवस्योक्तत्वादनुभवमात्रस्य शुक्तिरजता
दिसाधारणत्वान्मात्रान्तस्य न सत्यसिद्धिरित्यर्थः ॥ भेदस्यान्यतः सिद्धावपूर्वत्वा
भावान्न श्रुतितात्पर्यगोचरत्वमित्याह ॥ तत इति ॥ अपूर्वत्वरहिते त्वाक्त तात्पर्य
नेत्यत्रान्यायमाह ॥ श्रुतितात्पर्यमिति ॥ येन वाक्येन यत्र प्रत्यक्ष स्याद नैतन्मानाभावप्रतीर
पुनः सत्यत्वांकोनिवर्तते तस्य तत्र तात्पर्यमन्यथा तस्य तदर्थत्वायोगात्

भे. स.

॥३०॥ राम

यत्परः शब्दः स शब्दार्थ इति न्यायात् यथा ज्योतिष्टोमवाक्यस्य यागादिगतस्वर्गसाध-
नत्वादौ सन्देहत्वन्यतो निश्चिते ऽसत्वेऽशंकाया एवाभावात् श्रुतितात्पर्यकल्पनं विफलमि-
त्यर्थः॥ अर्थप्रतीतिमात्रमेव वाक्यतात्पर्यनियामकं किं न स्यादित्याशंक्य तस्यान्य-
थापि उपपत्तेर्न तत्कल्पकत्वमित्याह॥ न च श्रुतीति॥ प्रतीतिमात्रस्यार्थे तात्पर्यकल्पकत्वे
तिप्रसंगमाह॥ अन्यथेति॥ ग्रहं संमार्ष्टीत्यत्रोद्देश्यग्रहविशेषणतया प्रतिपन्नैकत्वे
पि तात्पर्ये तत्र ग्रहमात्रस्योद्देश्यत्वसंभवेपि तद्विशिष्टस्योद्देश्यत्वकल्पनापि गौरवात्
तस्यापद्युद्देश्यता स्यात्॥ ग्रहं संमा[illegible]ष्टि तच्च एकमिति ततश्च प्रत्यक्षोद्देश्यं वाक्य-

ना

न च श्रुतिजन्यज्ञानमात्रेण तत्तात्पर्यमिति नियमः। तात्पर्याभावेपि शाब्दज्ञानस्या-
दिभिरर्थप्रतीत्युपपत्तेः॥ अन्यथा ग्रहैकत्वादावपि तात्पर्यप्रसंगः॥ श्रुतिसि-
द्धमेव भेदं प्रत्यक्षादिरनुवदतीति विपरीतमेवास्तीति चेन्न॥ यस्य यत्प्रमाणाधीनो-

द्व१ पस्थितिस्स मायोर्विरोधोपस्थितिरूपवाक्यभेदः स्यादिति शब्दावगते तत्र तत्तात्पर्यकल्पनमयुक्तं त ना२
थापि तदित्यर्थः॥ न त्वेवमपि भेदस्य प्रत्यक्षादि[illegible] प्रवृत्तेः प्रागप्रवर्तत्वात् प्रथमप्रवृत्ति-
रम संभवात् श्रुतिसिद्धत्वेदनुवादित्वनियमस्तावदयुक्त इत्याह॥ नेति॥ तर्हि कस्यचित्
प्रथमप्रवृत्तत्वाच्छ्रुतिर्भेदे प्रमाणमित्याशंक्य तस्यानियमेनोत्तरभावित्वेन भेदस्य त-
त्प्रमेयत्वं निराकर्तुं प्रमेयत्वनियामकं तावदाह॥ यस्येति॥ प्रमाणाभावादि॥ इदमस-
दिति शंकायस्य येन प्रमाणेन व्यावर्त्यते तत्तत्प्रमेयमित्यर्थः॥ श्रीकृष्णपरब्रह्मणे नमः॥

५= निरपेक्षश्रुतिप्रमेयत्वात् श्रुतेस्तत्र तात्पर्योपपत्तिरिति शंकते॥ श्रुतिसिद्धमेवेति॥ प्रत्यक्षादेरपि निरपेक्षतया =५ कृष्ण

श्रुतेर्वाक्यार्थविषये मानांतरानपेक्षत्वेपि पदपदार्थव्युत्पत्तिसापेक्षत्वात्तस्याश्च प्रत्यक्षानुमा
नसापेक्षत्वात्तयोः एवं प्रवृत्तिरवरूपमभ्युपेयात तत्रश्चात्मभेदविषययोरपि प्रत्यक्षानुमान
योः निरूपितरूपयोः स्वसामग्रीतः प्रथमप्रवृत्तेः श्रुत्सनापि से [illegible] विवतदभिज्ञेष्वावरूपक
त्वात्तत एवात्मभेदासत्वशंकानिवृत्तेस्तत्सिद्धभेदानुवादिनी श्रुतिरतत्परेत्याह ॥ भेदस्य
त्यादिना ॥ ननु प्रत्यक्षसिद्ध आत्मभेदो व्यावहारिको सत्त्वास्तवस्तात [illegible] भेदोपूर्वः श्रुतिगम्या
भवत्वित्याशंक्य श्रुतेरनुवादत्ववारणायैवमपूर्वार्थकल्पने वेदे सर्वत्र मानांतरसिद्ध

॥ भेदस्य निरपेक्षानुभवव्याप्तिबलप्रवृत्तानुमानाभ्यामेवासद्भावतत्परासिद्धः
नवृत्तसापेक्षविलंबितश्रुत्येति श्रुतिरनुवादः ॥ नचानुभवाद्यगोचरतात्त्विकभे
दः श्रुतिगोचरः । जीवेभेदद्वयस्य बाधितत्वात् ॥ नचास्यैव तात्त्विकत्वं श्रुत्य
र्थ इति वाच्यं ॥ पामराणामपि तन्तात्त्विकबुद्धेः सत्वात् ॥ परं तु सोधिष्ठानचै
भि ५ तन्यनिष्ठेत्वस्मारुच्यते ॥ त्वयात्तु भेदस्यैवेति किं श्रुत्या ॥ श्रीरामजयराम ॥ ॥

विशिष्टार्थानुवादभंगप्रसंगेन भेदांतरस्य बाधितत्वान्मेवमित्याशयेनाह ॥ नचानुभवा
द्यगोचर इत्यादिना ॥ तर्हि प्रत्यक्षादिसिद्धभेदानुवादेन तस्य तदसिद्धं वा सत्ववत्वं श्रुत्याप्र
तिपाद्यत इत्याशंक्याति प्राकृतानामपि बाधानुदयेनोत्सर्गतस्त [illegible] सत्वस्यापि सि
द्धेर्मैवमित्याह ॥ नचास्यैवेति ॥ भेदे पामराणामपि तात्त्विकत्वबुद्धिस्वीकारे परस्येष्टाप
त्तिमाशंक्याह ॥ परं त्विति ॥ सा तात्त्विकबुद्धिः अधिष्ठानचैतन्यनिष्ठावस्तुतस्तत्त्वा
लिकविषयेस्पर्धः ॥ अनिदमि[illegible]रजता[illegible]दाविदंताप्रतिभासवद्वस्तुतः सद्धित्क्षणोपि भेदे

एतद्विवृणोति ॥ परस्येति ॥ भेदस्य तात्त्विकत्वं नाम बाधायोग्यत्वं तथा च तद्ग्राहकत्वेनाभ्यु
पेतप्रत्यक्षादिनैव बाध्यत्वरूपमिथ्यात्वस्य निषेधसिद्धिः परमते श्रुतेरिव प्रत्यक्षादेरपि
तत्त्वावेदकत्वात्तत्र च न तस्यापूर्वतेत्यर्थः ॥ परस्य प्रत्यक्षादिनाद्वैतासिद्ध्यनभ्युपग
मे बाधकमाह ॥ अन्यथेति ॥ भेदस्यापूर्वत्वाभावात् श्रुतिर्न तत्परेत्युपसंहरति ॥ तस्मा
